# कृष्णगीति माहात्म्यम्

श्री पी सी ऐट्टनुण्णि राजा

आसीत् पुरा विश्रुतकीर्त्तिभूमा
श्री मानवेदाभिधभूमिपालः
शैलाम्बुराशीश्वरवंशजातः
कौळम्बपूर्वे नवमे शताब्दे ॥१॥

स वृत्तवान् विष्णुपदावलम्बः
कवेर् बुधस्यापि पदम् प्रपन्नः
दिगन्तविश्रान्त यशः प्रकाश-
प्रशोभिताशो विरराज राजा ॥२ ॥

अयं हि नारायणभट्टपाद-
कवीश्वरस्य प्रथमानकीर्त्तेः
लीलाशुकस्याऽपि समानकाले
स्वेनात्मना विश्वमलं चकार ॥३ ॥

यस्मिन् कलौ सन्प्रति सन्निधत्ते
संवित्स्वरूपः स पुमान् पुराणः
तस्मिन् पुरे वायुपुरे पुरेदं
चिरं विरेजे त्रितयं कवीनां ॥४ ॥

अमीषु लीलाशुकयोगिवर्यः
श्रीकृष्णकर्ण्णामृतकाव्यकर्त्ता
साक्षात् सदा चर्म्मदृशैव कृष्ण-
मपारयद्द्रष्टुमपारभक्तिः ॥५ ॥

विश्वोपभोगेषु विसृष्टसक्तिः
विख्यातभक्तिर्विमलात्मशक्तिः
विश्वात्मनि न्यस्त समस्तवृत्तिर्-
विश्वम्भराजानिरपि न्यवासीत् ॥ ६ ॥

कदापि लीलाशुकमेत्य राजा
हृदा सदाराधित राधिकेशः
गदाधरालोकनबद्धतृष्णो
मुदान्वितः प्राह मुरारिदासः ॥ ७ ॥

'धन्योऽसि दृष्ट्वा भगवन् कळिन्द-
कन्यासरत्तीरचरं महस्तत्;
अन्योऽस्मि; तद्दर्शनकांक्ष्णो मे
मन्ये भवानेव भवेत्सहायः ॥ ८ ॥

कदापि गोपालक बालकस्य
कैशोरकं मोहनमात्तलीलं
व्यादीव्यतो मामक चित्तरंगे
पश्यामि किंस्वित् करुणापयोधे' ॥ ९ ॥

इत्युक्तवन्तं पृथिवीपतिं तं
प्रत्याह योगी कुशलानुयोगी
यद्यर्हता तेऽस्ति निशामनाय
पृष्ट्वा हरिं प्रातरुदाहरेयं ॥ १० ॥

अन्येद्युरासाद्य हरेरनुज्ञा-
माचष्टभूयः स महीमहीन्द्रं
' पृष्टो मयासीन्मदुसूदनस्त्वं
द्रष्टोऽसि सायं प्रतिपालये'ति ॥ ११ ॥

श्रुत्वा वचः कर्ण्णरसायनं तत्
स्मृत्वा मुकन्दस्य कृपामपारां
प्रमोदभाराकुलितेन तेन
व्यरोचि सायं मणिमाळिकायां ॥१२ ॥

ततः स जालान्तरदत्तदृष्टिर्
गृहान्कणे दिव्यकिशोरवेषं
बालैरुपेतं बकुळस्य मूले
लोलम्बनीलं कलयांबभूव ॥१३ ॥

केयूरहाराम्गदशोभमानं
मायूरपिञ्छोल्लसिताळकान्तं
मञ्जुक्कणत् कन्कणकिन्किणीकं
मन्दारमालाविलसत्कलापं ॥१४ ॥

अनारदोद्यन्मृदुमन्दहासं
असीमकानन्दरसप्रपूर्ण्णं
आलोक्य तं मोहनबालवेषं
आनन्दमग्न; स नृपो बभूव ॥१५ ॥

ततः समासादितमेव चक्षुः -
फलं स्वकीयं कलयन् नृपालः
तदंगसम्स्पर्शनतः स्वमम्गं
कर्त्तुं कृतार्त्तं स्पृहयाम् बभूव ॥१६ ॥

प्रवृद्धकौतूहलभारनुन्नः
प्रधाव्ययावत् समयात् गृहीतुं
'द्त्ष्टुं नहिस्पृष्टुमदामनुज्ञां'
इत्यूचिवानन्तरधान्मुकुन्दः ॥१७ ॥

तदा किलान्तर्दधतो मुरारेः
स्रस्तं शिरस्तः शिखिपिञ्छमेकं
आदाय मोदाल् कलयन् तमेव
प्रासादमासादयति स्म राजा ॥ १८ ॥

छित्वा पुनस्तं बकुळं नरेन्द्रः
कृत्वा वपुस्तेन हरेर्म्मनोज्ञं
समार्च्चितन्नित्यमभग्नभक्ति;-
रस्त्येतदद्यापि हि तद्गृहेषु ॥ १९ ॥

मुकुन्दसन्दर्शनतः स चित्ते
चित्रीयमाणश्चरितं तदीयं
व्यधाद्विचित्रार्त्थपदैरुपेतां
नाट्यानुरूपां किल कृष्णगीतिं ॥ २० ॥

दृष्ट्वैव भूयः स हि रासलोलं
विलोभनीयं भगवत्स्वरूपं
तस्याम् कृतौ वर्ण्णयति स्म राजे-
त्येवं तदैतिह्यविदो वदन्ति ॥ २१ ॥

अनन्तरं ताम् स च कृष्णगीति-
मायोजयद्रम्गभुवि प्रयोगे
तत्रापि कृष्णस्य किरीटकोटौ
कृष्णेन दत्तं शिखिपिञ्छकं च ॥ २२ ॥

अश्रौषं चरितमिदं यथाहि पूर्वै-
राख्यातं मम खलु पूर्वमातुलस्य
तत्सर्वं कुतुकभरात्तथैवपद्यै-
रद्योक्तं; जगति बुधा मुदं लभन्तं! ॥ २३ ॥